# Lambodara Stuti Naradamunikrita

# નારદમુનિકૃતા લમ્બોદરસ્તુતિઃ

## Document Information

Text title : Lambodara Stuti Naradamunikrita

File name : lambodarastutiHnAradamunikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 5 | 5.5. 23-40||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા લમ્બોદરસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવર્ષય ઊચુઃ ।

નમસ્તે ગણનાથાય લમ્બોદરધરાય ચ ।

ગજવક્ત્રાય સર્વેષાં નમઃ પૂજ્યાય તે નમઃ ॥ ૨૩॥

સ્વાનન્દપતયે તુભ્યં સર્વસ્વાનન્દદાયિને ।

અનાથાય ચ સર્વેષાં નાયકાય નમો નમઃ ॥ ૨૪॥

નમો વિઘ્નેશ્વરાયૈવ ભક્તવિઘ્નવિનાશિને ।

અભક્તાનાં મહાવિઘ્નકારકાય નમો નમઃ ॥ ૨૫॥

ઉત્પત્તિસ્થિતિસંહારહીનાય સર્વરૂપિણે ।

અનાદયે પરેશાય મહોદર નમોઽસ્તુ તે ॥ ૨૬॥

માયિનાં મોહકાયૈવ માયાવિને પરાત્મને ।

સર્વસિદ્ધિપ્રદાયૈવ નાનાવિદ્યાકલાત્મને ॥ ૨૭॥

અપારાનનરૂપાયાપારહસ્તપદાય ચ ।

ગુણેશાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૨૮॥

આદિમધ્યાન્તરૂપાયાદિમધ્યાન્તસ્વરૂપિણે ।

અનાકારાય તે ચાકારયુક્તાય નમો નમઃ ॥ ૨૯॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પતયે સર્વદાયિને ।

આદિપૂજ્યાય ચાન્તે તે સંસ્થિતાય નમો નમઃ ॥ ૩૦॥

નાનાવિધં જગત્ સર્વં બ્રહ્મ નાનાવિધં પ્રભો ।

સમ્ભૂતમુદરાત્તે વૈ તેન લમ્બોદરો ભવાન્ ॥ ૩૧॥

તવોદરભવાઃ સર્વે ત્વં ન કસ્યોદરોદ્ભવઃ ।

તેન લમ્બોદરોઽસિ ત્વં લમ્બોદર નમોઽસ્તુ તે ॥ ૩૨॥

સર્વેષામુદરાણાં ત્વં પારં જાનાસિ વિઘ્નપ ।

ઉદરસ્ય ન કસ્તેઽપિ પારં જાનાતિ તે નમઃ ॥ ૩૩॥

એતાદૃશોઽયમાનન્દાનામાનન્દપ્રદાયકઃ ।

પ્રત્યક્ષં દૃષ્ટિગો જાતોઽસ્માકં ધન્યા વયં તતઃ ॥ ૩૪॥
મનોવાણીવિહીનો ન મનોવાણીમયો ન ચ ।
લમ્બોદરઃ સમાયાત આશ્ચર્યં ભાતિ તે નમઃ ॥ ૩૫॥
કિં સ્તુવીમઃ ગણેશાનં યત્ર વેદાદયઃ પ્રભો ।
શાન્તિં પ્રાપ્તા વયં તત્ર નઃ પ્રસીદ નમો નમઃ ॥ ૩૬॥
એવમુક્ત્વા સુરાઃ સર્વે નનૃતુર્મુનયસ્તથા ।
તાનુવાચ ગણેશાનો મેઘગમ્ભીરનિઃસ્વનઃ ॥ ૩૭॥
(ફલશ્રુતિઃ)
લમ્બોદર ઉવાચ ।
વરં બ્રૂત મહાભાગા દેવેન્દ્રા મુનયોઽમલાઃ ।
તપસા મનસાઽભીષ્ટં ભક્ત્યા તુષ્ટો દદામ્યહમ્ ॥ ૩૮॥
ભવત્કૃતં મદીયં યત્ સ્તોત્રં સર્વપ્રદં ભવેત્ ।
પઠતે શૃણ્વતે ચેહામુત્ર સૌખ્યપ્રદં પરમ્ ॥ ૩૯॥
યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
નાનાસિદ્ધિપ્રદં ચાસ્તુ મમ ભક્તિવિવર્ધનમ્ ॥ ૪૦॥

ઇતિ નારદમુનિકૃતા લમ્બોદરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૫ । ૫.૫। ૨૩-૪૦॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 5 . 5.5. 23-40..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Lambodara Stuti Naradamunikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*